# Manasollasa

# માનસોલ્લાસ

## Document Information

Text title : manasollAsa or abhilakShitArthachintAmaNi

File name : manasollasa.itx

Category : shiva, stotra

Location : doc_shiva

Author : Sureshvaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Description-comments : A commentary (vArtika) on Shankara@s Dakshinamurti Stotra

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# માનસોલ્લાસ

॥ શ્રીદક્ષિણામૂર્તિસ્તોત્રમ્ ॥

વિશ્વં દર્પણદૃશ્યમાનનગરીતુલ્યં નિજાન્તર્ગતં
પશ્યન્નાત્મનિ માયયા બહિરિવોદ્ભૂતં યથા નિદ્રયા ।
યઃ સાક્ષાત્કુરુતે પ્રબોધસમયે સ્વાત્માનમેવાદ્વયં
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૧॥

બીજસ્યાન્તરિવાઙ્કુરો જગદિદં પ્રાઙ્નિર્વિકલ્પં પુનઃ
માયાકલ્પિતદેશકાલકલનાવૈચિત્ર્યચિત્રીકૃતમ્ ।
માયાવીવ વિજૃમ્ભયત્યપિ મહાયોગીવ યઃસ્વેચ્છયા
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૨॥

યસ્યૈવ સ્ફુરણં સદાત્મકમસત્કલ્પાર્થગં ભાસતે
સાક્ષાત્તત્ત્વમસીતિ વેદવચસા યો બોધયત્યાશ્રિતાન્ ।
યત્સાક્ષાત્કરણાદ્ભવેન્નપુનરાવૃત્તિર્ભવામ્ભોનિધૌ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૩॥

નાનાચ્છિદ્રઘટોદરસ્થિતમહાદીપપ્રભાભાસ્વરં
જ્ઞાનં યસ્ય તુ ચક્ષુરાદિકરણદ્વારા બહિઃસ્પન્દતે ।
જાનામીતિ તમેવ ભાન્તમનુભાત્યેતત્સમસ્તં જગત્
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૪॥

દેહં પ્રાણમપીન્દ્રિયાણ્યપિ ચલાં બુદ્ધિં ચ શૂન્યં વિદુઃ
સ્ત્રીબાલાન્ધજડોપમાસ્ત્વહમિતિ ભ્રાન્તા ભૃશં વાદિનઃ ।
માયાશક્તિવિલાસકલ્પિતમહાવ્યામોહસંહારિણે
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૫॥

રાહુગ્રસ્તદિવાકરેન્દુસદૃશો માયાસમાચ્છાદનાત્
સન્માત્રઃ કરણોપસંહરણતો યોઽભૂત્સુષુપ્તઃ પુમાન્ ।

પ્રાગસ્વાપ્સમિતિ પ્રબોધસમયે યઃ પ્રત્યભિજ્ઞાયતે
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૬॥

બાલ્યાદિષ્વપિ જાગ્રદાદિષુ તથા સર્વાસ્વવસ્થાસ્વપિ
વ્યાવૃત્તાસ્વનુવર્તમાનમહમિત્યન્તઃ સ્ફુરન્તં સદા ।
સ્વાત્માનં પ્રકટીકરોતિ ભજતાં યો મુદ્રયા ભદ્રયા
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૭॥

વિશ્વં પશ્યતિ કાર્યકારણતયા સ્વસ્વામિસંબન્ધતઃ
શિષ્યાચાર્યતયા તથૈવ પિતૃપુત્રાદ્યાત્મના ભેદતઃ ।
સ્વપ્ને જાગ્રતિ વા એષ પુરુષો માયાપરિભ્રામિતઃ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૮॥

ભૂરમ્ભાંસ્યનલોઽનિલોઽમ્બરમહર્નાથો હિમાંશુઃ પુમાન્
ઇત્યાભાતિ ચરાચરાત્મકમિદં યસ્યૈવ મૂર્ત્યષ્ટકમ્ ।
નાન્યત્કિઞ્ચન વિદ્યતે વિમૃશતાં યસ્માત્પરસ્માદ્વિભોઃ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૯॥

સર્વાત્મત્વમિતિ સ્ફુટીકૃતમિદં યસ્માદમુષ્મિંસ્તવે
તેનાસ્ય શ્રવણાત્તદર્થમનનાદ્ધ્યાનાચ્ચ સંકીર્તનાત્ ।
સર્વાત્મત્વમહાવિભૂતિસહિતં સ્યાદીશ્વરત્વં સ્વતઃ
સિદ્ધ્યેત્તત્પુનરષ્ટધા પરિણતં ચૈશ્વર્યમવ્યાહતમ્ ॥ ૧૦॥

॥ માનસોલ્લાસ ॥

વિશ્વં દર્પણદૃશ્યમાનનગરીતુલ્યં નિજાન્તર્ગતં
પશ્યન્નાત્મનિ માયયા બહિરિવોદ્ભૂતં યથા નિદ્રયા ।
યઃ સાક્ષાત્કુરુતે પ્રબોધસમયે સ્વાત્માનમેવાદ્વયં
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૧॥

મઙ્ગળં દિશતુ મે વિનાયકો
મઙ્ગળં દિશતુ મે સરસ્વતી ।
મઙ્ગળં દિશતુ મે મહેશ્વરો
મઙ્ગળં દિશતુ મે સદાશિવઃ ॥ ૧॥

આત્મલાભાત્પરો લાભો નાસ્તીતિ મુનયો વિદુઃ ।
તલ્લાભાર્થં કવિઃ સ્તૌતિ સ્વાત્માનં પરમેશ્વરમ્ ॥ ૨॥

સ્વેચ્છયા સૃષ્ટમાવિશ્ય વિશ્વં યો મનસિ સ્થિતઃ ।
સ્તોત્રેણ સ્તૂયતેઽનેન સ એવ પરમેશ્વરઃ ॥ ૩॥

અસ્તિ પ્રકાશત ઇતિ વ્યવહારઃ પ્રવર્તતે ।
તચ્ચાસ્તિત્વં પ્રકાશત્વં કસ્મિન્નર્થે પ્રતિષ્ઠિતમ્ ॥ ૪॥

કિં તેષુ તેષુ વાઽર્થેષુ કિં વા સર્વાત્મનીશ્વરે ।
ઈશ્વરત્વં ચ જીવત્વં સર્વાત્મત્વં ચ કીદૃશમ્ ॥ ૫॥

જાનીયાત્કથં જીવઃ કિં તજ્જ્ઞાનસ્ય સાધનમ્ ।
જ્ઞાનાત્તસ્ય ફલં કિં સ્યાદેકત્વં ચ કથં ભવેત્ ॥ ૬॥

સર્વજ્ઞઃ સર્વકર્તા ચ કથમાત્મા ભવિષ્યતિ ।
શિષ્યં પ્રતીત્થં પૃચ્છન્તં વક્તુમારભતે ગુરુઃ ॥ ૭॥

અન્તરસ્મિન્નિમે લોકા અન્તર્વિશ્વમિદં જગત્ ।
બહિર્વન્માયયાઽઽભાતિ દર્પણે સ્વશરીરવત્ ॥ ૮॥

સ્વપ્ને સ્વાન્તર્ગતં વિશ્વં યથા પૃથગિવેક્ષ્યતે ।
તથૈવ જાગ્રત્કાલેઽપિ પ્રપઞ્ચોઽયં વિવિચ્યતામ્ ॥ ૯॥

સ્વપ્ને સ્વસત્તૈવાર્થાનાં સત્તા નાન્યેતિ નિશ્ચિતા ।
કો જાગ્રતિ વિશેષોઽસ્તિ જડાનામાશુ નાશિનામ્ ॥ ૧૦॥

સ્વપ્ને પ્રકાશો ભાવાનાં સ્વપ્રકાશાન્ન હીતરઃ ।
જાગ્રત્યપિ તથૈવેતિ નિશ્ચિન્વન્તિ વિપશ્ચિતઃ ॥ ૧૧॥

નિદ્રયા દર્શિતાનર્થાન્ન પશ્યતિ યથોત્થિતઃ ।
સમ્યગ્જ્ઞાનોદયાદૂર્ધ્વં તથા વિશ્વં ન પશ્યતિ ॥ ૧૨॥

અનાદિમાયયા સુપ્તો યદા જીવઃ પ્રબુધ્યતે ।
અજન્મનિદ્રમસ્વપ્નમદ્વૈતં બુધ્યતે તદા ॥ ૧૩॥

શ્રુત્યાઽઽચાર્યપ્રસાદેન યોગાભ્યાસવશેન ચ ।
ઈશ્વરાનુગ્રહેણાપિ સ્વાત્મબોધો યદા ભવેત્ ॥ ૧૪॥

ભુક્તં યથાઽન્નં કુક્ષિસ્થં સ્વાત્મત્વેનૈવ પશ્યતિ ।
પૂર્ણાહન્તાકબળિતં વિશ્વં યોગીશ્વરસ્તથા ॥ ૧૫॥

યથા સ્વપ્ને નૃપો ભૂત્વા ભુક્ત્વા ભોગાન્યથેપ્સિતાન્ ।
ચતુરઙ્ગબલોપેતઃ શત્રું જિત્વા રણાઙ્ગણે ॥ ૧૬॥

પરાત્પરાજિતો ભૂત્વા વનં પ્રાપ્ય તપશ્ચરન્ ।
મુહૂર્તમાત્રમાત્માનં મન્યતે કલ્પજીવિનમ્ ॥ ૧૭॥

તથૈવ જાગ્રત્કાલેઽપિ મનોરાજ્યં કરોત્યસૌ ।
કાલનદ્યોઘયોગેન ક્ષીણમાયુર્ન પશ્યતિ ॥ ૧૮॥

મેઘચ્છન્નોંઽશુમાલીવ માયયા મોહિતોઽધિકમ્ ।
કિઞ્ચિત્કર્તા ચ કિઞ્ચિજ્જ્ઞો લક્ષ્યતે પરમેશ્વરઃ ॥ ૧૯॥

યદ્યત્કરોતિ જાનાતિ તસ્મિન્તસ્મિન્પરેશ્વરઃ ।
રાજા વિદ્વાન્ સ્વસામર્થ્યાદીશ્વરોઽયમિતીર્યતે ॥ ૨૦॥

જ્ઞાનક્રિયે શિવેનૈક્યાત્સઙ્ક્રાન્તે સર્વજન્તુષુ ।
ઈશ્વરત્વં ચ જીવાનાં સિદ્ધં તચ્છક્તિસઙ્ગમાત્ ॥ ૨૧॥

અયં ઘટોઽયં પટ ઇત્યેવં નાનાપ્રતીતિષુ ।
અર્કપ્રભેવ સ્વજ્ઞાનં સ્વયમેવ પ્રકાશતે ॥ ૨૨॥

જ્ઞાનં ન ચેત્સ્વયં સિદ્ધં જગદન્ધં તમો ભવેત્ ।
ન ચેદસ્ય ક્રિયા કાચિત્ વ્યવહારઃ કથં ભવેત્ ॥ ૨૩॥

ક્રિયા નામ પરિસ્પન્દપરિણામસ્વરૂપિણી ।
સ્પન્દમાને બહિર્જ્ઞાને તદઙ્કુરવદુદ્ભવેત્ ॥ ૨૪॥

ઉત્પાદ્યપ્રાપ્યસંસ્કાર્યવિકાર્યોપાશ્રયા ક્રિયા ।
કરોતિ ગચ્છત્યુન્માર્ષ્ટિ છિનત્તીતિ પ્રતીયતે ॥ ૨૫॥

શિવો બ્રહ્માદિદેહેષુ સર્વજ્ઞ ઇતિ ભાસતે ।
દેવતિર્યઙ્મનુષ્યેષુ કિઞ્ચિજ્જ્ઞાસ્તારતમ્યતઃ ॥ ૨૬॥

જરાયુજોઽણ્ડજશ્ચૈવ સ્વેદજઃ પુનરુદ્ભિદઃ ।
એતે ચતુર્વિધાઃ દેહાઃ ક્રમશો ન્યૂનવૃત્તયઃ ॥ ૨૭॥

બ્રહ્માદિસ્તમ્બપર્યન્તા સ્વપ્નકલ્પૈવ કલ્પના ।
સાક્ષાત્કૃતેઽનવચ્છિન્નપ્રકાશે પરમાત્મનિ ॥ ૨૮॥

અણોરણીયાન્મહતો મહીયાનિતિ વેદવાક્ ।
રુદ્રોપનિષદપ્યેતં સ્તૌતિ સર્વાત્મકં શિવમ્ ॥ ૨૯॥

ઈશ્વરો ગુરુરાત્મેતિ મૂર્તિભેદવિભાગિને ।

વ્યોમવદ્વ્યાપ્તદેહાય દક્ષિણામૂર્તયે નમઃ ॥ ૩૦॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે પ્રથમોલ્લાસસંગ્રહઃ ॥ ૩૧॥

બીજસ્યાન્તરિવાઙ્કુરો જગદિદં પ્રાઙ્નિર્વિકલ્પં પુનઃ
માયાકલ્પિતદેશકાલકલનાવૈચિત્ર્યચિત્રીકૃતમ્ ।
માયાવીવ વિજૃમ્ભયત્યપિ મહાયોગીવ યઃસ્વેચ્છયા
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૨॥

ઉપાદાનં પ્રપઞ્ચસ્ય સંયુક્તાઃ પરમાણવઃ ।
મૃદન્વિતો ઘટસ્તસ્માદ્ભાસતે નેશ્વરાન્વિતઃ ॥ ૧॥

પરમાણુગતા એવ ગુણા રૂપરસાદયઃ ।
કાર્યે સમાનજાતીયમારભન્તે ગુણાન્તરમ્ ॥ ૨॥

કાર્યં યત્ર સમન્વેતિ કારણં સમવાયિ તત્ ।
ચક્રાદ્યં સાધનં યત્તુ ઘટસ્યાસમવાયિ તત્ ॥ ૩॥

સમવાયિનિ તિષ્ઠેદ્યત્ સમવાય્યાશ્રયે તથા ।
કાર્યેઽવધૃતસામર્થ્યં કલ્પ્યતેઽસમવાયિ તત્ ॥ ૪॥

નિમિત્તં કારણં તેષામીશ્વરશ્ચ કુલાલવત્ ।
યત્કાર્યં જાયતે યસ્માત્તસ્મિન્ તત્પ્રતિતિષ્ઠતિ ॥ ૫॥

મૃત્તિકાયાં ઘટસ્તન્તૌ પટઃ સ્વર્ણેઽઙ્ગુલીયકમ્ ।
ઇતિ વૈશેષિકાઃ પ્રાહુસ્તથા નૈયાયિકા અપિ ॥ ૬॥

રજઃ સત્ત્વં તમશ્ચેતિ પ્રધાનસ્ય ગુણાસ્ત્રયઃ ।
રજો રક્તં ચલં તેષુ સત્ત્વં શુક્લં પ્રકાશકમ્ ॥ ૭॥

તમઃ કૃષ્ણં ચાવરકં સૃષ્ટિસ્થિત્યન્તહેતવઃ ।
ઇતિ સાંખ્યાશ્ચ ભાષન્તે તેષાં દૂષણ ઉચ્યતે ॥ ૮॥

અઙ્કુરાદિફલાન્તેષુ કાર્યેષ્વસ્તિત્વમિષ્યતે ।
કુત આગત્ય સમ્બદ્ધા વટબીજેષુ તે કણાઃ ॥ ૯॥

કારણાનુગતં કાર્યમિતિ સર્વૈશ્ચ સમ્મતમ્ ।
તસ્માત્સત્તા સ્ફુરત્તા ચ સર્વત્રાપ્યનુવર્તતે ॥ ૧૦॥

પુષ્પે ફલત્વમાપન્ને ક્ષીરે ચ દધિતાં ગતે ।

વિજાતીયાઃ પ્રતીયન્તે ગુણા રૂપરસાદયઃ ॥ ૧૧॥

કારણં કાર્યમંશોંઽશી જાતિવ્યક્તી ગુણી ગુણઃ ।
ક્રિયા ક્રિયાવાનિત્યાદ્યાઃ પ્રકાશસ્યૈવ કલ્પનાઃ ॥ ૧૨॥

ચૈતન્યં પરમાણૂનાં પ્રધાનસ્યાપિ નેષ્યતે ।
જ્ઞાનક્રિયે જગત્ક્લૃપ્તૌ દૃશ્યેતે ચેતનાશ્રયે ॥ ૧૩॥

કાલરૂપક્રિયાશક્ત્યા ક્ષીરાત્પરિણમેદ્દધિ ।
જ્ઞાતૃજ્ઞાનજ્ઞેયરૂપં જ્ઞાનશક્ત્યા ભવેજ્જગત્ ॥ ૧૪॥

જ્ઞાનં દ્વિધા વસ્તુમાત્રદ્યોતકં નિર્વિકલ્પકમ્ ।
સવિકલ્પન્તુ સંજ્ઞાદિદ્યોતકત્વાદનેકધા ॥ ૧૫॥

સઙ્કલ્પસંશયભ્રાન્તિસ્મૃતિસાદૃશ્યનિશ્ચયાઃ ।
ઊહોઽનધ્યવસાયશ્ચ તથાઽન્યેનુભવા અપિ ॥ ૧૬॥

પ્રત્યક્ષમેકં ચાર્વાકાઃ કણાદસુગતૌ પુનઃ ।
અનુમાનઞ્ ચ તચ્ચાપિ સાંખ્યાઃ શબ્દં ચ તે અપિ ॥ ૧૭॥

ન્યાયૈકદર્શિનોપ્યેવમુપમાનં ચ કે ચન ।
અર્થાપત્ત્યા સહૈતાનિ ચત્વાર્યાહ પ્રભાકરઃ ॥ ૧૮॥

અભાવષષ્ઠાન્યેતાનિ ભાટ્ટા વેદાન્તિનસ્તથા ।
સમ્ભવૈતિહ્યયુક્તાનિ તાનિ પૌરાણિકા જગુઃ ॥ ૧૯॥

દ્રવ્યં ગુણસ્તથા કર્મ સામન્યં ચ વિશેષકમ્ ।
સમવાયં ચ કાણાદાઃ પદાર્થાન્ષટ્પ્રચક્ષતે ॥ ૨૦॥

નવ દ્રવ્યાણિ ભૂતાનિ દિક્કાલાત્મમનાંસિ ચ ।
ચતુર્વિંશતિરેવ સ્યુર્ગુણાઃ શબ્દાદિપઞ્ચકમ્ ॥ ૨૧॥

પરિમાણં ચ સઙ્ખ્યા ચ દ્વૌ સંયોગવિભાગકૌ ।
સ્વભાવતઃ પૃથક્ત્વં ચ ગુરુત્વં દ્રવતા પુનઃ ॥ ૨૨॥

પરત્વં ચાપરત્વં ચ સ્નેહઃ સંસ્કાર ઇત્યપિ ।
ધીર્દ્વેષસુખદુઃખેચ્છાધર્માધર્મપ્રયત્નકાઃ ॥ ૨૩॥

સંસ્કારસ્ત્રિવિધો વેગ ઇષ્વાદેર્ગતિકારણમ્ ।
દૃષ્ટશ્રુતાનુભૂતાર્થસ્મૃતિહેતુશ્ચ ભાવના ॥ ૨૪॥

સ્થિતસ્થાપકતા નામ પૂર્વવત્સ્થિતિકારણમ્ ।
આકૃષ્ટશાખાભૂર્જાદૌ સ્પષ્ટમેવોપલક્ષ્યતે ॥ ૨૫॥

ઉત્ક્ષેપણમવક્ષેપો ગમનં ચ પ્રસારણમ્ ।
આકુઞ્ચનમિતિ પ્રાહુઃ કર્મ પઞ્ચવિધં બુધાઃ ॥ ૨૬॥

સામાન્યં દ્વિવિધં પ્રોક્તં પરં ચાપરમેવ ચ ।
પરં સત્તૈવ સર્વત્ર તદનુસ્યૂતવર્તનમ્ ॥ ૨૭॥

દ્રવ્યત્વં ચ ગુણત્વાદ્યં સામાન્યમપરં તથા ।
વિશેષાઃ સ્યુરનન્તાસ્તે વ્યાવૃત્તિજ્ઞાનહેતવઃ ॥ ૨૮॥

રૂપસ્યેવ ઘટે નિત્યઃ સમ્બન્ધઃ સમવાયકઃ ।
કાલાકાશદિગાત્માનો નિત્યાશ્ચ વિભવશ્ચ તે ॥ ૨૯॥

ચતુર્વિધાઃ પરિચ્છિન્ના નિત્યાશ્ચ પરમાણવઃ ।
ઇતિ વૈશેષિકમતે પદાર્થાઃ ષટ્ પ્રકીર્તિતાઃ ॥ ૩૦॥

માયા પ્રધાનમવ્યક્તમવિદ્યાઽજ્ઞાનમક્ષરમ્ ।
અવ્યાકૃતં ચ પ્રકૃતિઃ તમ ઇત્યભિધીયતે ॥ ૩૧॥

માયાયાં બ્રહ્મચૈતન્યપ્રતિબિમ્બાનુષઙ્ગતઃ ।
મહત્કાલપુમાંસઃ સ્યુઃ મહત્તત્ત્વાદહંકૃતિઃ ॥ ૩૨॥

તામસાત્સ્યુરહઙ્કારાત્ખાનિલાગ્ન્યમ્બુભૂમયઃ ।
શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધોપ્યનુક્રમાત્ ॥ ૩૩॥

ઇન્દ્રિયાણાં ચ વિષયા ભૂતાનામપિ તે ગુણાઃ ।
દેવાઃ સદાશિવશ્ચેશો રુદ્રો વિષ્ણુશ્ચતુર્મુખઃ ॥ ૩૪॥

સાત્ત્વિકાત્સ્યાદહઙ્કારાદન્તઃકરણધીન્દ્રિયમ્ ।
મનો બુદ્ધિરહઙ્કારશ્ચિત્તં કરણમાન્તરમ્ ॥ ૩૫॥

સંશયો નિશ્ચયો ગર્વઃ સ્મરણં વિષયા અમી ।
ચન્દ્રઃ પ્રજાપતી રુદ્રઃ ક્ષેત્રજ્ઞ ઇતિ દેવતાઃ ॥ ૩૬॥

શ્રોત્રં ત્વક્ચક્ષુ જિહ્વા ઘ્રાણં જ્ઞાનેન્દ્રિયં વિદુઃ ।
દિગ્વાતસૂર્યવરુણા નાસત્યૌ દેવતાઃ સ્મૃતાઃ ॥ ૩૭॥

રાજસાત્સ્યુરહઙ્કારાત્કર્મેન્દ્રિયસમીરણાઃ ।
કર્મેન્દ્રિયાણિ વાક્પાણિઃ પાદઃ પાયુરુપસ્થકમ્ ॥ ૩૮॥

વચનાદાનગમનવિસર્ગાનન્દસંજ્ઞકાઃ ।
વિષયા દેવતાસ્તેષાં વહ્નીન્દ્રોપેન્દ્રમૃત્યુકાઃ ॥ ૩૯॥

પ્રાણોપાનઃ સમાનશ્ચોદાનવ્યાનૌ ચ વાયવઃ ।
ભૂતૈસ્તુ પઞ્ચભિઃ પ્રાણૈઃ ચતુર્દશભિરિન્દ્રિયૈઃ ॥ ૪૦॥

ચતુર્વિંશતિતત્ત્વાનિ સાઙ્ખ્યશાસ્ત્રવિદો વિદુઃ ।
મહાન્કાલઃ પ્રધાનં ચ માયાવિદ્યે ચ પૂરુષઃ ॥ ૪૧॥

ઇતિ પૌરાણિકાઃ પ્રાહુસ્ત્રિંશત્તત્ત્વાનિ તૈઃ સહ ।
બિન્દુનાદૌ શક્તિશિવૌ શાન્તાતીતૌ તતઃ પરમ્ ॥ ૪૨॥

ષટ્ત્રિંશત્તત્વમિત્યુક્તં શૈવાગમવિશારદૈઃ ।
સર્વે વિકલ્પાઃ પ્રાગાસન્ બીજેઽઙ્કુર ઇવાત્મનિ ॥ ૪૩॥

ઇચ્છાજ્ઞાનક્રિયારૂપમાયયા તે વિજૃમ્ભિતાઃ ।
ઇચ્છાજ્ઞાનક્રિયાપૂર્વા યસ્માત્સર્વાઃ પ્રવૃત્તયઃ ॥ ૪૪॥

સર્વેઽપિ જન્તવસ્તસ્માદીશ્વરા ઇતિ નિશ્ચિતાઃ ।
બીજાદ્વૃક્ષસ્તરોબીજં પારમ્પર્યેણ જાયતે ॥ ૪૫॥

ઇતિશઙ્કાનિવૃત્ત્યર્થં યોગિદૃષ્ટાન્તકીર્તનમ્ ।
વિશ્વામિત્રાદયઃ પૂર્વે પરિપક્વસમાધયઃ ॥ ૪૬॥

ઉપાદાનોપકરણપ્રયોજનવિવાર્જિતાઃ ।
સ્વેચ્છયા સસૃજુઃ સર્ગં સર્વભોગોપબૃંહિતમ્ ॥ ૪૭॥

ઈશ્વરોઽનન્તશક્તિત્વાત્સ્વતન્ત્રોઽન્યાનપેક્ષકઃ ।
સ્વેચ્છામાત્રેણ સકલં સૃજત્યવતિ હન્તિ ચ ॥ ૪૮॥

ન કારકાણાં વ્યાપારાત્કર્તા સ્યાન્નિત્ય ઈશ્વરઃ ।
નાપિ પ્રમાણવ્યાપરાત્ જ્ઞાતાઽસૌ સ્વપ્રકાશકઃ ॥ ૪૯॥

જ્ઞાતૃત્વમપિ કર્તૃત્વં સ્વાતન્ત્ર્યાત્તસ્ય કેવલમ્ ।
યા ચેચ્છાશક્તિવૈચિત્રી સાઽસ્ય સ્વચ્છન્દકારિતા ॥ ૫૦॥

યયા કર્તું ન વા કર્તુમન્યથા કર્તુમર્હતિ ।
સ્વતન્ત્રામીશ્વરેચ્છાં કે પરિચ્છેતુમિહેશતે ॥ ૫૧॥

શ્રુતિશ્ચ સોઽકામયતેતીચ્છયા સૃષ્ટિમીશિતુઃ ।

તસ્માદાત્મન આકાશઃ સમ્ભૂત ઇતિ ચાબ્રવીત્ ॥ ૫૨॥

નિમિત્તમાત્રં ચેદસ્ય જગતઃ પરમેશ્વરઃ ।
વિકારિત્વં વિનાશિત્વં ભવેદસ્ય કુલાલવત્ ॥ ૫૩॥

બુદ્ધ્યાદયો નવ ગુણાઃ નિત્યા એવેશ્વરસ્ય ચેત્ ।
નિત્યેચ્છાવાન્ જગત્સૃષ્ટૌ પ્રવર્તેતૈવ સર્વદા ॥ ૫૪॥

પ્રવૃત્ત્યુપરમાભાવાત્સંસારો નૈવ નશ્યતિ ।
મોક્ષોપદેશો વ્યર્થઃ સ્યાદાગમોઽપિ નિરર્થકઃ ॥ ૫૫॥

તસ્માન્માયાવિલાસોઽયં જગત્કર્તૃત્વમીશિતુઃ ।
બન્ધમોક્ષોપદેશાદિવ્યવહારોઽપિ માયયા ॥ ૫૬॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે દ્વિતીયોલ્લાસસંગ્રહઃ ॥ ૫૭॥

યસ્યૈવ સ્ફુરણં સદાત્મકમસત્કલ્પાર્થગં ભાસતે
સાક્ષાત્તત્ત્વમસીતિ વેદવચસા યો બોધયત્યાશ્રિતાન્ ।
યત્સાક્ષાત્કરણાદ્ભવેન્નપુનરાવૃત્તિર્ભવામ્ભોનિધૌ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૩॥

સત્તાસ્ફુરત્તે ભાવેષુ કુત આગત્ય સઙ્ગતે ।
બિમ્બાદિદર્પણન્યાયાદિત્થં પૃચ્છન્ પ્રબોધ્યતે ॥ ૧॥

અસત્કલ્પેષુ ભાવેષુ જડેષુ ક્ષણનાશિષુ ।
અસ્તિત્વં ચ પ્રકાશત્વં નિત્યાત્સંક્રામતીશ્વરાત્ ॥ ૨॥

આત્મસત્તૈવ સત્તૈષાં ભાવાનાં ન તતોઽધિકા ।
તથૈવ સ્ફુરણં ચૈષાં નાત્મસ્ફુરણતોઽધિકમ્ ॥ ૩॥

જ્ઞાનાનિ બહુરૂપાણિ તેષં ચ વિષયા અપિ ।
અહઙ્કારેઽનુષજ્યન્તે સૂત્રે મણિગણા ઇવ ॥ ૪॥

પ્રકાશાભિન્નમેવૈતદ્વિશ્વં સર્વસ્ય ભાસતે ।
લહરીબુદ્બુદાદીનાં સલિલાન્ન પૃથક્સ્થિતિઃ ॥ ૫॥

જાનામિત્યેવ યજ્જ્ઞાનં ભાવાનાવિશ્ય વર્તતે ।
જ્ઞાતં મયેતિ તત્પશ્ચાદ્વિશ્રામ્યત્યન્તરાત્મનિ ॥ ૬॥

ઘટાદિકાનિ કાર્યાણિ વિશ્રામ્યન્તિ મૃદાદિષુ ।

વિશ્વં પ્રકાશાભિન્નત્વાદ્વિશ્રામ્યેત્પરમેશ્વરે ॥ ૭॥

સ્વગતેનૈવ કાળિમ્ના દર્પણં મલિનં યથા ॥

અજ્ઞાનેનાવૃતં જ્ઞાનં તેન મુહ્યન્તિ જન્તવઃ ॥ ૮॥

ઘટાકાશો મહાકાશો ઘટોપાધિકૃતો યથા ।
દેહોપાધિકૃતો ભેદો જીવાત્પરમાત્મનોઃ ॥ ૯॥

તત્ત્વમસ્યાદિવાક્યૈસ્તુ તયોરૈક્યં પ્રદર્શ્યતે ।
સોયં પુરુષ ઇત્યુક્તે પુમાનેકો હિ દૃશ્યતે ॥ ૧૦॥

યજ્જગત્કારણં તત્ત્વં તત્પદાર્થઃ સ ઉચ્યતે ।
દેહાદિભિઃ પરિચ્છિન્નો જીવસ્તુ ત્વંપદાભિધઃ ॥ ૧૧॥

તદ્દેશકાલાવસ્થાદૌ દૃષ્ટઃ સ ઇતિ કથ્યતે ।
તથૈતદ્દેશકાલાદૌ દૃષ્ટોઽયમિતિ કીર્ત્યતે ॥ ૧૨॥

મુખ્યં તદેતદ્વૈશિષ્ટ્યં વિસૃજ્ય પદયોર્દ્વયોઃ ।
પુમ્માત્રં લક્ષયત્યેકં યથા સોયં પુમાન્વચઃ ॥ ૧૩॥

પ્રત્યક્ત્વં ચ પરાક્ત્વં ચ ત્યક્ત્વા તત્ત્વમસીતિ વાક્ ।
તથૈવ લક્ષયત્યૈકં જીવાત્મપરમાત્મનોઃ ॥ ૧૪॥

સામાનાધિકરણાખ્યઃ સમ્બન્ધઃ પદયોરિહ ।
વિશેષણવિશેષ્યત્વં સમ્બન્ધઃ સ્યાત્પદાર્થયોઃ ॥ ૧૫॥

લક્ષ્યલક્ષણસંયોગાદ્વાક્યમૈક્યં ચ બોધયેત્ ।
ગઙ્ગાયાં ઘોષ ઇતિવન્ન જહલ્લક્ષણા ભવેત્ ॥ ૧૬॥

નાજહલ્લક્ષણાઽપિ સ્યાચ્છ્વેતોધાવતિવાક્યવત્ ।
તત્ત્વમસ્યાદિવાક્યાનાં લક્ષણા ભાગલક્ષણા ॥ ૧૭॥

સોઽયં પુરુષ ઇત્યાદિવાક્યાનામિવ કીર્તિતા ।
ભિન્નવૃત્તિનિમિત્તાનાં શબ્દાનામેકવસ્તુનિ ॥ ૧૮॥

પ્રવૃત્તિસ્તુ સમાનાધિકરણત્વમિહોચ્યતે ।
પરસ્યાંશો વિકારો વા જીવો વાક્યેન નોચ્યતે ॥ ૧૯॥

જીવાત્મના પ્રવિષ્ટત્વાત્સ્વમાયાસૃષ્ટમૂર્તિષુ ।
નિરંશો નિર્વિકારોઽસૌ શ્રુત્યા યુક્ત્યા ચ ગમ્યતે ॥ ૨૦॥

ઘટાકાશો વિકરો વા નાંશો વા વિયતો યથા ।
ત્વમિન્દ્રોસીતિવદ્વાક્યં ન ખલુ સ્તુતિતત્પરમ્ ॥ ૨૧॥

ન સાદૃશ્યપરં વાક્યમગ્નિર્માણવકાદિવત્ ।
ન કાર્યકારણત્વસ્ય સાધનં મૃદ્ઘટાદિવત્ ॥ ૨૨॥

ન જાતિ વ્યક્તિગમકં ગૌઃ ખણ્ડ ઇતિવદ્વચઃ ।
ગુણગુણ્યાત્મકં વાક્યં નૈતન્નીલોત્પલાદિવત્ ॥ ૨૩॥

નોપાસનાપરં વાક્યં પ્રતિમાસ્વીશબુદ્ધિવત્ ।
ન વૌપચારિકં વાક્યં રાજવદ્રાજપૂરુષે ॥ ૨૪॥

જીવાત્મના પ્રવિષ્ટોઽસાવીશ્વરઃ શ્રૂયતે યતઃ ।
દેહેન્દ્રિયમનોબુદ્ધિપ્રાણાહઙ્કારસંહતૌ ॥ ૨૫॥

આત્મસઙ્કુલનાદજ્ઞૈરાત્મત્વં પ્રતિપાદ્યતે ।
વહ્નિધીઃ કાષ્ઠલોહાદૌ વહ્નિસઙ્કુલનાદિવ ॥ ૨૬॥

દેહમન્નમયં કોશમાવિશ્યાત્મા પ્રકાશતે ।
સ્થૂલો બાલઃ કૃશઃ કૃષ્ણો વર્ણાશ્રમવિકલ્પવાન્ ॥ ૨૭॥

પ્રાણકોશેઽપિ જીવામિ ક્ષુધિતોઽસ્મિ પિપાસિતઃ ।
સંશિતો નિશ્ચિતો મન્યે ઇતિ કોશે મનોમયે ॥ ૨૮॥

વિજ્ઞાનમયકોશસ્થો વિજાનામીતિ તિષ્ઠતિ ।
આનન્દમયકોશાખ્યે ત્વહઙ્કારે પુરાકૃતૈઃ ॥ ૨૯॥

પુણ્યૈરુપાસનાભિશ્ચ સુખિતોઽસ્મીતિ મોદતે ।
એવં કંચુકિતઃ કોશૈઃ કંચુકૈરિવ પઞ્ચભિઃ ॥ ૩૦॥

પરિચ્છિન્ન ઇવાભાતિ વ્યાપ્તોઽપિ પરમેશ્વરઃ ।
યથા સલિલમાવિશ્ય બહુધા ભાતિ ભસ્કરઃ ॥ ૩૧॥

તથા શરીરાણ્યાવિશ્ય બહુધા સ્ફુરતીશ્વરઃ ।
કારણત્વં ચ કાર્યત્વં તટસ્થં લક્ષણં તયોઃ ॥ ૩૨॥

શાખાયાં ચન્દ્ર ઇતિવન્નૈવ મુખ્યમિદં મતમ્ ।
મહાપ્રકાશ ઇત્યુક્તં સ્વરૂપં ચન્દ્રલક્ષણમ્ ॥ ૩૩॥

સચ્ચિદાનન્દરૂપત્વં સ્વરૂપં લક્ષણં તયોઃ ।
એકલક્ષણયોરૈક્યં વાક્યેન પ્રતિપાદ્યતે ॥ ૩૪॥

તસ્માદેકપ્રકાશત્વં સર્વાત્મત્વમિતિ સ્થિતમ્ ।
દેવતિર્યઙ્મનુષ્યાણાં પ્રકાશાન્ન પૃથક્સ્થિતિઃ ॥ ૩૫॥

જીવઃ પ્રકાશાભિન્નત્વાત્સર્વાત્મેત્યભિધીયતે ।
એવં પ્રકાશરૂપત્વપરિજ્ઞાને દૃઢીકૃતે ॥ ૩૬॥

પુનરાવૃત્તિરહિતં કૈવલ્યં પદમશ્નુતે ।
સકૃત્પ્રસક્તમાત્રોઽપિ સર્વાત્મત્વ યદૃચ્છયા ॥ ૩૭॥

સર્વપાપવિનિર્મુક્તઃ શિવલોકે મહીયતે ।
સર્વાત્મભાવના યસ્ય પરિપક્વા મહાત્મનઃ ।
સંસારતારકઃ સાક્ષાત્સ એવ પરમેશ્વરઃ ॥ ૩૮॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે તૃતીયોલ્લાસસંગ્રહઃ ॥ ૩૯॥

નાનાચ્છિદ્રઘટોદરસ્થિતમહાદીપપ્રભાભાસ્વરં
જ્ઞાનં યસ્ય તુ ચક્ષુરાદિકરણદ્વારા બહિઃસ્પન્દતે ।
જાનામીતિ તમેવ ભાન્તમનુભાત્યેતત્સમસ્તં જગત્
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૪॥

સ્વતઃ સન્તઃ પ્રકાશન્તે ભાવા ઘટપટાદયઃ ।
નેશ્વરસ્ય સમાવેશાદિત્યસ્યોત્તરમુચ્યતે ॥ ૧॥

અહમિત્યનુસન્ધાતા જાનામીતિ ન ચેત્સ્ફુરેત્ ।
કસ્ય કો વા પ્રકાશેત જગચ્ચ સ્યાત્સુષુપ્તવત્ ॥ ૨॥

પ્રાગૂર્ધ્વં ચાસતાં સત્ત્વં વર્તમાનેઽપિ ન સ્વતઃ ।
તસ્માદીશે સ્થિતં સત્ત્વં પ્રાગૂર્ધ્વત્વવિવર્જિતે ॥ ૩॥

સ્વયમેવ પ્રકાશેરન્ જડા યદિ વિનેશ્વરમ્ ।
સર્વં સર્વસ્ય ભાસેત ન વા ભાસેત કિઞ્ચન ॥ ૪॥

તસ્માત્સર્વજ્ઞમજ્ઞં વા જગત્સ્યાદેકરૂપકમ્ ।
તુલ્યે સ્વયંપ્રકાશત્વે જડચેતનયોર્મિથઃ ॥ ૫॥

તુલ્યમેવ પ્રસજ્યેરન્ ગ્રાહ્યગ્રાહકતાદયઃ ।
ઇન્દ્રિયાણામનિયમાચ્ચાક્ષુષા સ્યૂ રસાદયઃ ॥ ૬॥

મલિનામલિનાદર્શપશ્ચાત્પ્રાગ્ભાગતુલ્યયોઃ ।
ક્રિયાશક્તિજ્ઞાનશક્ત્યેરન્તઃકરણભાગયોઃ ॥ ૭॥

પ્રતિબિમ્બે સ્ફુરન્નીશઃ કર્તા જ્ઞાતેતિ કથ્યતે ।
બુદ્ધિઃ સત્ત્વગુણોત્કર્ષાન્નિર્મલો દર્પણો યથા ॥ ૮॥

ગૃહ્ણાતિ વિષયચ્છાયામાત્મચ્છાયાનુભાવતઃ ।
અન્તઃકરણસમ્બન્ધાન્નિખિલાનીન્દ્રિયાણ્યપિ ॥ ૯॥

રથાઙ્ગનેમિવલયે કીલિતા ઇવ કીલકાઃ ।
નાડ્યોઽન્તઃકરણે સ્યૂતા જલસંસ્યૂતસૂત્રવત્ ॥ ૧૦॥

તાભિસ્તુ ગોળકાન્તાભિઃ પ્રસર્પન્તિ સ્ફુલિઙ્ગવત્ ।
કરણાનિ સમસ્તાનિ યથાસ્વં વિષયં પ્રતિ ॥ ૧૧॥

દેહસ્ય મધ્યમં સ્થાનં મૂલાધાર ઇતીર્યતે ।
ગુદાત્તુ દ્વ્યઙ્ગુલાદૂર્ધ્વં મેઢ્રાત્તુ દ્વ્યઙ્ગુલાદધઃ ॥ ૧૨॥

ત્રિકોણોઽધોમુખાગ્રશ્ચ કન્યકાયોનિસન્નિભઃ ।
યત્ર કુણ્ડલિની નામ પરાશક્તિઃ પ્રતિષ્ઠિતા ॥ ૧૩॥

પ્રાણાગ્નિબિન્દુનાદાનાં સવિત્રી સા સરસ્વતી ।
મૂલાધારાગ્રકોણસ્થા સુષુમ્ના બ્રહ્મરન્ધ્રગા ॥ ૧૪॥

મૂલેઽર્ધચ્છિન્નવંશાભા ષડાધારસમન્વિતા ।
તત્પાર્શ્વકોણયોર્જાતે દ્વે ઇડાપિઙ્ગલે સ્થિતે ॥ ૧૫॥

નાડીચક્રમિતિ પ્રાહુઃ તસ્માન્નાડ્યઃ સમુદ્ગતાઃ ।
ગાન્ધારી હસ્તિજિહ્વા ચ નયનાન્તં પ્રધાવતઃ ॥ ૧૬॥

નાડીચક્રેણ સંસ્યૂતે નાસિકાન્તમુભે ગતે ।
નાભિમણ્ડલમાશ્રિત્ય કુક્કુટાણ્ડમિવ સ્થિતમ્ ॥ ૧૭॥

નાડીચક્રમિતિ પ્રાહુસ્તસ્માન્નાડ્યઃ સમુદ્ગતાઃ ।
પૂષા ચાલમ્બુષા નાડી કર્ણદ્વયમુપાશ્રિતે ।
નાડી શુક્લાહ્વયા તસ્માદ્ ભ્રૂમધ્યમુપસર્પતિ ॥ ૧૮॥

સરસ્વત્યાહ્વયા નાડી જિહ્વાન્તા વાક્પ્રસારિણી ।
નાડી વિશ્વોદરી નામ ભુઙ્ક્તેઽન્નં સા ચતુર્વિધમ્ ॥ ૧૯॥

પીત્વા પયસ્વિની તોયં કણ્ઠસ્થા કુરુતે ક્ષુતમ્ ।

નાડીચક્રાત્સમુદ્ભૂતા નાડ્યસ્તિસ્રસ્ત્વધોમુખાઃ ॥ ૨૦॥

રાકા શુક્લં સિનીવાલી મૂત્રં મુઞ્ચેત્કુહુર્મલમ્ ।
ભુક્તાન્નરસમાદાય શઙ્ખિની ધમની પુનઃ ॥ ૨૧॥

કપાલકુહરં ગત્વા મૂર્ધ્નિ સઞ્ચિનુતે સુધામ્ ।
શતં ચૈકા ચ નાડ્યઃ સ્યુસ્તાસામેકા શિરોગતા ॥ ૨૨॥

તયોર્ધ્વમાયન્મુક્તઃ સ્યાદિતિ વેદાન્તશાસનમ્ ।
યદા બુદ્ધિગતૈઃ પુણ્યૈઃ પ્રેરિતેન્દ્રિયમાર્ગતઃ ॥ ૨૩॥

શબ્દાદીન્ વિષયાન્ ભુઙ્ક્તે તદા જાગરિતં ભવેત્ ।
સંહૃતેષ્વિન્દ્રિયેષ્વેષુ જાગ્રત્સંસ્કારજાન્પુમાન્ ॥ ૨૪॥

માનસાન્વિષયાન્ભુઙ્ક્તે સ્વપ્નાવસ્થા તદા ભવેત્ ।
મનસોપ્યુપસંહારઃ સુષુપ્તિરિતિ કથ્યતે ॥ ૨૫॥

તત્ર માયાસમાચ્છન્નઃ સન્માત્રો વર્તતે પુમાન્ ।
મૂઢો જડોઽજ્ઞ ઇત્યેવં માયાવેશાત્પ્રકાશતે ॥ ૨૬॥

સુખમસ્વાપ્સમિત્યેવં પ્રબોધસમયે પુમાન્ ।
સચ્ચિદાનન્દરૂપઃ સન્ સમ્યગેવ પ્રકાશતે ॥ ૨૭॥

ઇત્થં જગત્સમાવિશ્ય ભાસમાને મહેશ્વરે ।
સૂર્યાદયોઽપિ ભાસન્તે કિમુતાન્યે ઘટાદયઃ ॥ ૨૮॥

તસ્માત્સત્તા સ્ફુરત્તા ચ ભાવાનામીશ્વરાશ્રયાત્ ।
સત્યં જ્ઞાનમનન્તં ચ શ્રુત્યા બ્રહ્મોપદિશ્યતે ॥ ૨૯॥

જાગ્રત્સ્વપ્નોદ્ભવં સર્વમસત્યં જડમન્ધવત્ ।
ઈશ્વરશ્ચાહમિત્યેવં ભાસતે સર્વજન્તુષુ ॥ ૩૦॥

નિર્વિકલ્પશ્ચ શુદ્ધશ્ચ મલિનશ્ચેત્યહં ત્રિધા ।
નિર્વિકલ્પં પરં બ્રહ્મ નિર્ધૂતાખિલકલ્પનમ્ ॥ ૩૧॥

ધૂલ્યન્ધકારધૂમાભ્રનિર્મુક્તગગનોપમમ્ ।
વિવેકસમયે શુદ્ધં દેહાદીનાં વ્યપોહનાત્ ॥ ૩૨॥

યથાઽન્તરિક્ષં સંક્ષિપ્તં નક્ષત્રૈઃ કિઞ્ચિદીક્ષ્યતે ।
દેહેન્દ્રિયાદિસંસર્ગાન્મલિનં કલુષીકૃતમ્ ॥ ૩૩॥

યથાऽऽકાશં તમોરૂઢં સ્ફુરત્યનવકાશવત્ ।
અહમિત્યૈશ્વરં ભાવં યદા જીવઃ પ્રબુધ્યતે ॥ ૩૪॥

સર્વજ્ઞઃ સર્વકર્તા ચ તદા જીવો ભવિષ્યતિ ।
માયયાધિકસમ્મૂઢો વિદ્યયેશઃ પ્રકાશતે ॥ ૩૫॥

નિર્વિકલ્પાનુસન્ધાને સમ્યગાત્મા પ્રકાશતે ।
અવિદ્યાખ્યતિરોધાનવ્યપાયે પરમેશ્વરઃ ।
દક્ષિણામૂર્તિરૂપોસૌ સ્વયમેવ પ્રકાશતે ॥ ૩૬॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે ચતુર્થોલ્લાસસંગ્રહઃ ॥ ૩૭॥

દેહં પ્રાણમપીન્દ્રિયાણ્યપિ ચલાં બુદ્ધિં ચ શૂન્યં વિદુઃ
સ્ત્રીબાલાન્ધજડોપમાસ્ત્વહમિતિ ભ્રાન્તા ભૃશં વાદિનઃ ।
માયાશક્તિવિલાસકલ્પિતમહાવ્યામોહસંહારિણે
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૫॥

પ્રમાણમેકં પ્રત્યક્ષં તત્ત્વં ભૂતચતુષ્ટયમ્ ।
મોક્ષશ્ચ મરણાન્નાન્યઃ કામાર્થૌ પુરુષાર્થકૌ ॥ ૧॥

ન હિ ખલ્વીશ્વરઃ કર્તા પરલોકકથા વૃથા ।
દેહં વિનાऽસ્તિ ચેદાત્મા કુમ્ભવદ્દૃશ્યતાં પુરઃ ॥ ૨॥

હ્રસ્વો દીર્ઘો યુવા બાલ ઇતિ દેહો હિ દૃશ્યતે ।
અસ્તિ જાતઃ પરિણતો વૃદ્ધઃ ક્ષીણો જરન્મૃતઃ ॥ ૩॥

ઇત્યેવમુક્તાઃ ષડ્ભાવવિકારા દેહસંશ્રયાઃ ।
વર્ણાશ્રમવિભાગશ્ચ દેહેષ્વેવ પ્રતિષ્ઠિતઃ ॥ ૪॥

જાતકર્માદિસંસ્કારો દેહસ્યૈવ વિધીયતે ।
શતં જીવેતિ દેહસ્ય પ્રયુઞ્જન્ત્યાશિષં શુભામ્ ॥ ૫॥

ઇતિ પ્રપઞ્ચં ચાર્વાકો વંચયત્યલ્પચેતનઃ ।
કેચિચ્છ્વસિમિ જીવામિ ક્ષુધિતોऽસ્મિ પિપાસિતઃ ॥ ૬॥

ઇત્યાદિપ્રત્યયબલાત્પ્રાણમાત્મેતિ મન્વતે ।
કેચિચ્છૃણોમિ પશ્યામિ જિઘ્રામ્યા સ્વાદયામ્યહમ્ ॥ ૭॥

ઇતીન્દ્રિયાણામાત્મત્વં પ્રતિયન્તિ તતોધિકમ્ ।

જાનામિપ્રત્યયબલાદ્બુદ્ધિરિત્યપરે જગુઃ ॥ ૮॥

માયાવ્યામૂઢચિત્તાનાં તેષાં દૂષણમુચ્યતે ।
દેહાદીનાં જડાર્થાનાં પાષાણવદનાત્મનામ્ ॥ ૯॥

કથં ભવેદહમ્ભાવઃ સમાવેશં વિનેશિતુઃ ।
દેહસ્તાવદયં નાત્મા દૃશ્યત્વાચ્ચ જડત્વતઃ ॥ ૧૦॥

રૂપાદિમત્ત્વાત્સાંશત્વાદ્ભૌતિકત્વાચ્ચ કુમ્ભવત્ ॥

મૂર્ચ્છાસુષુપ્તિમરણેશ્વપિ દેહઃ પ્રતીયતે ॥ ૧૧॥

દેહાદિવ્યતિરિક્તત્વાત્તદાઽઽત્મા ન પ્રકાશતે ।
યથા જગત્પ્રવૃત્તીનામાદિકારણમંશુમાન્ ॥ ૧૨॥

પુમાંસ્તથૈવ દેહાદિપ્રવૃત્તૌ કારણં પરમ્ ।
મમ દેહોયમિત્યેવં સ્ત્રીબાલાન્ધાશ્ચ મન્વતે ॥ ૧૩॥

દેહોહમિતિ નાવૈતિ કદાચિદપિ કશ્ચન ।
ઇન્દ્રિયાણ્યપિ નાત્માનઃ કરણત્વાત્પ્રદીપવત્ ॥ ૧૪॥

વીણાદિવાદ્યવચ્છ્રોત્રં શબ્દગ્રહણસાધનમ્ ।
ચક્ષુસ્તેજસ્ત્રિતયવદ્રૂપગ્રહણસાધનમ્ ॥ ૧૫॥

ગન્ધસ્ય ગ્રાહકં ઘ્રાણં પુષ્પસમ્પુટકાદિવત્ ।
રસસ્ય ગ્રાહિકા જિહ્વા દધિક્ષૌદ્રઘૃતાદિવત્ ॥ ૧૬॥

ઇન્દ્રિયાણિ ન મે સન્તિ મૂકોન્ધો બધિરોસ્મ્યહમ્ ।
ઇત્યાહુરિન્દ્રિયૈર્હીના જનાઃ કિં તે નિરાત્મકાઃ ॥ ૧૭॥

પ્રાણોપ્યાત્મા ન ભવતિ જ્ઞાનાભાવાત્સુષુપ્તિષુ ।
જાગ્રત્સ્વપ્નોપભોગોત્થશ્રમવિચ્છિત્તિહેતવે ॥ ૧૮॥

સુષુપ્તિં પુરુષે પ્રાપ્તે શરીરમભિરક્ષિતુમ્ ।
શેષકર્મોભોગાર્થં પ્રાણશ્ચરતિ કેવલમ્ ॥ ૧૯॥

પ્રાણસ્ય તત્રાચૈતન્યં કરણોપરમે યદિ ।
પ્રાણે વ્યાપ્રિયમાણે તુ કરણોપરમઃ કથમ્ ॥ ૨૦॥

સમ્રાજિ હિ રણોદ્યુક્તે વિરમન્તિ ન સૈનિકાઃ ।
તસ્માન્ન કરણસ્વામી પ્રાણો ભવિતુમર્હતિ ॥ ૨૧॥

મનસઃ પ્રેરકે પુંસિ વિરતે વિરમન્ત્યતઃ ।
કરણાનિ સમસ્તાનિ તેષાં સ્વામી તતઃ પુમાન્ ॥ ૨૨॥

બુદ્ધિસ્તુ ક્ષણિકા વેદ્યા ગમાગમસમન્વિતા ।
આત્મનઃ પ્રતિબિમ્બેન ભાસિતા ભાસયેજ્જગત્ ॥ ૨૩॥

આત્મન્યુત્પદ્યતે બુદ્ધિરાત્મન્યેવ પ્રલીયતે ।
પ્રાગૂર્ધ્વં ચાસતી બુદ્ધિઃ સ્વયમેવ ન સિધ્યતિ ॥ ૨૪॥

જ્ઞાનાચ્ચેત્પૂર્વપૂર્વસ્માદુત્તરોત્તરસમ્ભવઃ ।
યુગપદ્બહુબુદ્ધિત્વં પ્રસજ્યેત ક્ષણે ક્ષણે ॥ ૨૫॥

બુદ્ધ્યન્તરં ન જનયેન્નાશોત્ત્રમસત્ત્વતઃ ।
એષાં સઙ્ઘાત આત્મા ચેદેકદેશે પૃથક્કૃતે ॥ ૨૬॥

ન ચૈતન્યં પ્રસજ્યેત સઙ્ઘાતાભાવતસ્તદા ।
ભિન્નદૃગ્ગત્યભિપ્રાયે બહુચેતનપુઞ્જિતમ્ ॥ ૨૭॥

સદ્યો ભિન્નં ભવેદેતન્નિષ્ક્રિયં વા ભવિષ્યતિ ।
દેહસ્યાન્તર્ગતોપ્યાત્મા વ્યાપ્ત એવેતિ બુધ્યતે ॥ ૨૮॥

અણુપ્રમાણશ્ચેદેષ વ્યાપ્નુયાન્નાખિલં વપુઃ ।
દેહપ્રમાણશ્ચેન્ન સ્યાદ્બાલસ્ય સ્થવિરાદિતા ॥ ૨૯॥

દેહવત્પરિણામી ચેત્તદ્વદેવ વિનઙ્ક્ષ્યતિ ।
કર્મણાં પરિણામેન ક્રિમિહસ્ત્યાદિમૂર્તિષુ ॥ ૩૦॥

વ્યાપ્તત્વાત્પ્રવિશત્યાત્મા ઘટાદિષ્વન્તરિક્ષવત્ ।
પરમાણુપ્રમાણેઽપિ મનસિ પ્રતિભાસતે ॥ ૩૧॥

સ્વપ્ને ચરાચરં વિશ્વમાત્મન્યેવ પ્રતિષ્ઠિતમ્ ।
દેહાદિષ્વહમિત્યેવં ભ્રમઃ સંસારહેતુકઃ ॥ ૩૨॥

અન્તઃ પ્રવિષ્ટઃ શાસ્તેતિ મોક્ષાયોપાદિશચ્છ્રુતિઃ ।
એવમેષા મહામાયા વાદિનામપિ મોહિની ॥ ૩૩॥

યસ્માત્સાક્ષાત્કૃતે સદ્યો લીયતે ચ સદાશિવે ।
દેહેન્દ્રિયાસુહીનાય માનદૂરસ્વરૂપિણે ।
જ્ઞાનાનન્દસ્વરૂપાય દક્ષિણામૂર્તયે નમઃ ॥ ૩૪॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થ પ્રતિપાદકે ।

પ્રબન્ધે માનસોલ્લાસે પઞ્ચમોલ્લાસસઙ્ગ્રહઃ ॥ ૩૫॥

રાહુગ્રસ્તદિવાકરેન્દુસદૃશો માયાસમાચ્છાદનાત્
સન્માત્રઃ કરણોપસંહરણતો યોઽભૂત્સુષુપ્તઃ પુમાન્ ।
પ્રાગસ્વાપ્સમિતિ પ્રબોધસમયે યઃ પ્રત્યભિજ્ઞાયતે
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૬॥

સ્વપ્ને વિશ્વં યથાઽન્તસ્થં જાગ્રત્યપિ તથેતિ ચેત્ ।
સુષુપ્તૌ કસ્ય કિં ભાતિ કઃ સ્થાયી તત્ર ચેતનઃ ॥ ૧॥

સર્વં ચ ક્ષણિકં શૂન્યં સર્વમેવ સ્વલક્ષણમ્ ।
સઙ્ઘાતઃ પરમાણૂનાં મહ્યમ્બ્વગ્નિસમીરણાઃ ॥ ૨॥

મનુષ્યાદિશરીરાણિ સ્કન્ધપંચકસંહતિઃ ।
સ્કન્ધાશ્ચ રૂપવિજ્ઞાનસંજ્ઞાસંકારવેદનાઃ ॥ ૩॥

રૂપ્યન્ત ઇતિ રૂપાણિ વિષયાશ્ચેન્દ્રિયાણ્યપિ ।
વિષયેન્દ્રિયયોર્જ્ઞાનં વિજ્ઞાનસ્કન્ધ ઉચ્યતે ॥ ૪॥

સંજ્ઞાગુણક્રિયાજાતિવિશિષ્ટપ્રત્યયાત્મિકા ।
પઞ્ચધા કલ્પના પ્રોક્તા સંજ્ઞાસ્કન્ધસ્ય સૌગતૈઃ ॥ ૫॥

ગવાં ગૌરિતિ સંજ્ઞોક્તા જાતિર્ગોત્વં તુ ગોગતમ્ ।
ગુણાઃ શુક્લાદયસ્તસ્ય ગચ્છત્યાદ્યાસ્તથા ॥ ૬॥

શ‍ૃઙ્ગી ચતુષ્પાલ્લાઙ્ગૂલી વિશિષ્ટપ્રત્યયો હ્યસૌ ।
એવં પઞ્ચવિધા ક્લૃપ્તઃ સંજ્ઞાસ્કન્ધ ઇતીર્યતે ॥ ૭॥

રાગાદ્યાઃ પુણ્યપાપે ચ સંસ્કારસ્કન્ધ ઉચ્યતે ।
સુખં દુઃખં ચ મોક્ષશ્ચ સ્કન્ધઃ સ્યાદ્વેદનાહ્વયઃ ॥ ૮॥

પઞ્ચભ્ય એવ સ્કન્ધેભ્યો નાન્ય આત્માસ્તિ કશ્ચન ।
ન કશ્ચદીશ્વરઃ કર્તા સ્વગતાતિશયં જગત્ ॥ ૯॥

સ્કન્ધેભ્યઃ પરમાણુભ્યઃ ક્ષણિકેભ્યોઽભિજાયતે ।
પૂર્વપૂર્વક્ષણાદેવ ક્ષણઃ સ્યાદુત્તરોત્તરઃ ॥ ૧૦॥

પૂર્વસ્માદેવ હિ જ્ઞાનાજ્જાયતે જ્ઞાનમુત્તરમ્ ।
સ એવાયમિતિ જ્ઞાનં સેયં જ્વાલેવ વિભ્રમઃ ॥ ૧૧॥

અસ્તિ ભાતીતિધીભ્રાન્તૈરાત્માનાત્મસુ કલ્પ્યતે ।

હાનોપાદાનરાહિત્યાદાકાશઃ કિં પ્રકાશતે ॥ ૧૨॥

ઇત્યેવં બૌદ્ધસિદ્ધાન્તી ભાષમાણો નિષિદ્ધ્યતે ।
શૂન્યં ચેજ્જગતો હેતુઃ જગદેવ ન સિદ્ધ્યતિ ॥ ૧૩॥

ઘટઃ શૂન્યઃ પટઃ શૂન્યઃ ઇતિ કૈઃ પ્રતિપાદ્યતે ।
નૈવ ભાસેત શૂન્યં ચેજ્જગન્નરવિષાણવત્ ॥ ૧૪॥

વસ્ત્વર્થી કિમુપાદદ્યાદ્ભારાર્થઃ કિં પરિત્યજેત્ ।
કો વિદધ્યાન્નિષિદ્ધ્યેદ્વા શૂન્યત્વાત્સ્વસ્ય ચાત્મનઃ ॥ ૧૫॥

અવસીદેન્નીરાકૂતં તસ્માત્સર્વમિદં જગત્ ।
સ્કન્ધાનાં પરમાણૂનાં ન સઙ્ઘાતયિતાસ્તિ ચેત્ ॥ ૧૬॥

સઙ્ઘાતો ન વિના હેતું જડા ઘટપટાદયઃ ।
મહાનુભાવો ભૂયાસમિતિ ભ્રાન્તશ્ચ મન્યતે ॥ ૧૭॥

આત્માપલાપકો બૌદ્ધઃ કિમર્થં ચરતિ વ્રતમ્ ।
પ્રત્યભિજ્ઞા યદિ ભ્રાન્તિઃ ભોજનાદિ કથં ભવેત્ ॥ ૧૮॥

ઇષ્ટસાધનમેવૈતદન્નં ગતદિનાન્નવત્ ।
ઇતિ નિશ્ચિત્ય બાલોઽપિ ભોજનાદૌ પ્રવર્તતે ॥ ૧૯॥

અવકાશપ્રદાતૃત્વમાકાશાર્થક્રિયા યથા ।
તથૈવાર્થક્રિયા પુંસઃ કર્તૃત્વજ્ઞાતૃતાદિકા ॥ ૨૦॥

સુષુપ્તિસમયેપ્યાત્મા સત્યજ્ઞાનસુખાત્મકઃ ।
સુખમસ્વાપ્સમિત્યેવં પ્રત્યભિજ્ઞાયતે યતઃ ॥ ૨૧॥

પ્રત્યભિજ્ઞાયત ઇતિ પ્રયોગઃ કર્મકર્તરિ ।
આત્મા સ્વયંપ્રકાશાત્વાજ્જાનાત્યાત્માનમાત્મના ॥ ૨૨॥

સુષુપ્તૌ માયયા મૂઢઃ જડોન્ધ ઇતિ લક્ષ્યતે ।
અપ્રકાશતયા ભાતિ સ્વપ્રકાશતયાપિ ચ ॥ ૨૩॥

જડાત્મનિ ચ દેહાદૌ સાક્ષાદીશો વિવિચ્યતે ।
એષૈવ મોહિની નામ માયાશક્તિર્મહેશિતુઃ ॥ ૨૪॥

મોહાપોહઃ પ્રમાતૃણાં મોક્ષ ઇત્યભિધીયતે ।
અવસ્થાત્રયનિર્મુક્તો દોષદિભિરનાવિલઃ ॥ ૨૫॥

ઇષીક ઇવ સન્માત્રો ન્યગ્રોધકણિકોપમઃ ।
બાહ્યાબાહ્યદળોન્મુક્તકદળીકન્દસન્નિભઃ ॥ ૨૬॥

નિરંશો નિર્વિકારશ્ચ નિરાભાસો નિરઞ્જનઃ ।
પુરુષઃ કેવલઃ પૂર્ણઃ પ્રોચ્યતે પરમેશ્વરઃ ॥ ૨૭॥

વાચો યત્ર નિવર્તન્તે મનો યત્ર વિલીયતે ।
એકીભવન્તિ યત્રૈવ ભૂતાનિ ભુવનાનિ ચ ॥ ૨૮॥

સમસ્તાનિ ચ તત્ત્વાનિ સમુદ્રે સિન્ધવો યથા ।
કઃ શોકસ્તત્ર કો મોહ એકત્વમનુપશ્યતઃ ॥ ૨૯॥

વાચ્યવાચકરૂપત્વાત્સવિકલ્પોઽપિ સન્નયમ્ ।
દેહાદીનાં વ્યપોહેન સમ્ભવેન્નિર્વિકલ્પકમ્ ॥ ૩૦॥

અસન્નેવ ભવેદ્વિદ્વાનસદ્બ્રહ્મેતિ વેદ ચેત્ ।
અસ્તિ બ્રહ્મેતિ ચેદ્વેદ સન્તેમેનં તતો વિદુઃ ॥ ૩૧॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે ષષ્ઠોલ્લાસસ્ય સઙ્ગ્રહઃ ॥ ૩૨॥

બાલ્યાદિષ્વપિ જાગ્રદાદિષુ તથા સર્વાસ્વવસ્થાસ્વપિ
વ્યાવૃત્તાસ્વનુવર્તમાનમહમિત્યન્તઃ સ્ફુરન્તં સદા ।
સ્વાત્માનં પ્રકટીકરોતિ ભજતાં યો મુદ્રયા ભદ્રયા
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૭॥

પ્રત્યભિજ્ઞાબલાદાત્મા સ્થાયી નિર્ધાર્યતે યદિ ।
કા નામ પ્રત્યભિજ્ઞૈષા કિં વા તસ્યાઃ પ્રયોજનમ્ ॥ ૧॥

પ્રત્યક્ષાદિપ્રમાણેષુ પ્રત્યભિજ્ઞા ન પઠ્યતે ।
કથં તસ્યાઃ પ્રમાણત્વમિતિ પૃચ્છન્ પ્રબોધ્યતે ॥ ૨॥

ભાતસ્ય કસ્ય ચિત્પૂર્વં ભાસમાનસ્ય સામ્પ્રતમ્ ।
સોઽયમિત્યનુસન્ધાનં પ્રત્યભિજ્ઞાનમુચ્યતે ॥ ૩॥

તદ્દેશકાલાકારાદીનવધૂયાનુષઙ્ગિકાન્ ।
યથૈકં વસ્ત્વનુસ્યૂતં સોઽયમિત્યભિધીયતે ॥ ૪॥

માયાનુષઙ્ગસઞ્જાતકિઞ્ચિજ્જ્ઞત્વાદ્યપોહનાત્ ।
સર્વજ્ઞત્વાદિવિજ્ઞાનં પ્રત્યભિજ્ઞાનમાત્મનઃ ॥ ૫॥

પૂર્વજન્માનુભૂતાર્થસ્મરણાન્મૃગશાબકઃ ।
જનનીસ્તન્યપાનાય સ્વયમેવ પ્રવર્તતે ॥ ૬॥

તસ્માન્નિશ્ચીયતે સ્થાયીત્યાત્મા દેહાન્તરેષ્વપિ ।
સ્મૃતિં વિના ન ઘટતે સ્તન્યપાનં શિશોર્યતઃ ॥ ૭॥

પૂર્વત્રાનુભવે કાલે સ્મૃતિકાલે પરત્ર સન્ ।
આત્મા સંસ્કારરૂપેણ સ્મરત્યર્થં સ્વનિષ્ઠિતમ્ ॥ ૮॥

પ્રત્યભિજ્ઞેતિ ભાવાનાં સ્મૃતિશ્ચેદભિધીયતે ।
આત્મસ્થૈર્યે પ્રમાણત્વં સ્મૃતિશ્ચ પ્રાપ્નુયાત્કથમ્ ॥ ૯॥

સ્મૃતૌ પ્રકાશો નાર્થસ્ય ન ચાપ્યર્થસ્ય નિશ્ચયઃ ।
ન ચાપ્યર્થાનુભવયોરઙ્ગુલ્યોરિવ સમ્ભવેત્ ॥ ૧૦॥

નાનુભૂતિવિશિષ્ટસ્ય પદાર્થસ્ય ચ દણ્ડિવત્ ।
સર્વત્રાપ્યેવમિત્યેવં પ્રસઙ્ગાદિતિ ચેચ્છૃણુ ॥ ૧૧॥

પ્રાક્તનાનુભવે નષ્ટે તદવષ્ટમ્ભસમ્ભવાત્ ।
સંસ્કારસંજ્ઞાત્સામગ્ર્યાત્ પૌરુષાજ્જાયતે સ્મૃતિઃ ॥ ૧૨॥

આવેદ્યાનુભવે નષ્ટે તદીયં વિષયં પ્રતિ ।
અનુભાવકમાત્માનં બોધયત્યનપાયિનમ્ ॥ ૧૩॥

વિષયે ચ પ્રમુષિતે નષ્ટે વાઽનુભવે સતિ ।
સ્વવિશ્રાન્તં સ્મરત્યર્થં દેવોઽપ્રમુષિતઃ સદા ॥ ૧૪॥

પ્રમોષણં પ્રમાતૃણાં માયયા તમસા કૃતમ્ ।
માયાવિદ્યે પ્રભોઃ શક્તી ભાનોશ્છાયાપ્રભોપમે ॥ ૧૫॥

અર્થાનાચ્છદયેન્માયા વિદ્યા વ્યાક્ષિપ્ય દર્શયેત્ ।
પ્રત્યભિજ્ઞૈવ સર્વેષાં પ્રમાણાનાં ચ સાધનમ્ ॥ ૧૬॥

ઈશ્વરોન્યોહમપ્યન્ય ઇતિ વિચ્છેદકારિણીમ્ ।
વ્યાક્ષિપ્ય વિદ્યયા માયામીશ્વરોહમિતિ સ્મૃતિઃ ॥ ૧૭॥

ઈષત્પ્રકાશોભૂદીશો માયાયવનિકાવૃતઃ ।
સમ્યગાવરણાપાયે સહસ્રાંશુરિવ સ્ફુરેત્ ॥ ૧૮॥

ન કારણાનાં વ્યાપારઃ પ્રમાણાનાં ન વા પુનઃ ।
પ્રત્યભિજ્ઞાપનં નામ મોહાપસરણં પરમ્ ॥ ૧૯॥

યાવન્તિ સન્તિ માનાનિ વ્યવહારપ્રવૃત્તયે ।
તેષાં મોહાપસરણાદ્વ્યપારોન્યો ન વિદ્યતે ॥ ૨૦॥

જડાનૃતપરિચ્છિન્નદેહધર્માશ્ચિદાત્મનિ ।
સત્યજ્ઞાનસુખાત્મત્વં મોહાદ્દેહેઽપિ કલ્પ્યતે ॥ ૨૧॥

શુક્તૌ રજતમિત્યેવં યથા વ્યામુહ્યતેઽન્યથા ।
સએવ રૂપ્યં ચેદ્ભાતિ વિલયસ્તે ન સિધ્યતિ ॥ ૨૨
નાત્યન્તાસત્પ્રકાશેત નરશ‌ૃઙ્ગાદિવત્ક્વચિત્ ।
કાન્તાકરાદૌ રજતમિતિ સ્યાત્સ્મરણં ભ્રમે ॥ ૨૩॥

તેનેદં તુલ્યમિત્યેવં સ્યાત્સાદૃશ્યાદ્યદિ ભ્રમઃ ।
પીતઃ શઙ્ખો ગુડસ્તિક્ત ઇત્યાદૌ નાસ્તિ તુલ્યતા ॥ ૨૪॥

તાદાત્મ્યેન સ્ફુરતિ ચેદ્રજતત્વેન શુક્તિકા ।
વિભ્રમો નિરધિષ્ઠાનો બાધો નિરવધિર્ભવેત્ ॥ ૨૫॥

બુદ્ધિસ્થિતં ચેદ્રજતં બાહ્યત્વેન પ્રતીયતે ।
ગુઞ્જાદૌ જ્વલનારોપે દેહદાહઃ પ્રસજ્યતે ॥ ૨૬॥

યુક્તિહીનપ્રકાશત્વાદ્ ભ્રાન્તેર્ન હ્યસ્તિ લક્ષણમ્ ।
યદિ સ્યાલ્લક્ષણં કિંચિદ્ ભ્રાન્તિરેવ ન સિધ્યતિ ॥ ૨૭॥

જલચન્દ્રવદેકસ્મિન્નિર્ભયે રજ્જુસર્પવત્ ।
પ્રતીયતે યથા સ્વર્ણે કારણે કટકાદિવત્ ॥ ૨૮॥

ઉપાત્તે રૂપ્યવચ્છુક્તૌ વ્યાપ્તે યક્ષપુરીવ ખે ।
રશ્મ્યમ્બુવત્સ્ફુરદ્રૂપે સ્થાણૌ ચોરવદક્રિયે ॥ ૨૯॥

અસત્કલ્પમિદં વિશ્વમાત્મન્યારોપ્યતે ભ્રમાત્ ।
સ્વયંપ્રકાશં સદ્રૂપં ભ્રાન્તિબાધવિવર્જિતમ્ ॥ ૩૦॥

પ્રત્યભિજ્ઞાયતે વસ્તુ પ્રાગ્વન્મોહે વ્યપોહિતે ।
દેહાદ્યુપાધૌ નિર્ધૂતે સ્યાદાત્મૈવ મહેશ્વરઃ ॥ ૩૧॥

સ્મૃતિઃ પ્રત્યક્ષમૈતિહ્યમિત્યાદીન્યપરાણ્યપિ ।
પ્રમાણાન્યાપ્તવાગાહ પ્રત્યભિજ્ઞાપ્રસિદ્ધયે ॥ ૩૨॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।

પ્રબન્ધે માનસોલ્લાસે સપ્તમોલ્લાસસઙ્ગ્રહઃ ॥ ૩૩॥

વિશ્વં પશ્યતિ કાર્યકારણતયા સ્વસ્વામિસંબન્ધતઃ
શિષ્યાચાર્યતયા તથૈવ પિતૃપુત્રાદ્યાત્મના ભેદતઃ ।
સ્વપ્ને જાગ્રતિ વા એષ પુરુષો માયાપરિભ્રામિતઃ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૮॥

પ્રકાશવ્યતિરેકેણ પદાર્થઃ કોઽપિ નાસ્તિ ચેત્ ।
પરમાર્થોપદેશાન્તો વ્યવહારઃ કથં ભવેત્ ॥ ૧॥

કસ્ય બન્ધશ્ચ મોક્ષશ્ચ બધ્યતે કેન હેતુના ।
માયયા લક્ષણં કિં સ્યાદિત્યેવં પરિપૃચ્છતઃ ॥ ૨॥

પ્રશનઃ સ્યાદુત્તરં વક્તું પ્રતિપત્તું સુખેન ચ ।
ઉક્તોર્થઃ સપ્તભિઃ શ્લોકૈઃ પુનઃ સંક્ષિપ્ય કથ્યતે ॥ ૩॥

પૌનરુક્ત્યં ન દોષોઽત્ર શબ્દેનાર્થેન વા ભવેત્ ।
અભ્યાસેન ગરીયસ્ત્વમર્થસ્ય પ્રતિપાદ્યતે ॥ ૪॥

સ્વયંપ્રકાશે સદ્રૂપેઽપ્યેકસ્મિન્પરમેશ્વરે ।
કાર્યકારણસમ્બન્ધાદ્યનેકવિધકલ્પના ॥ ૫॥

રાહોઃ શિરઃ સુષિઃ ખસ્ય મમાત્મા પ્રતિમાવપુઃ ।
ઇત્યાદિકલ્પના તુલ્યા ન પૃથગ્વસ્તુગોચરા ॥ ૬॥

ઉપાસ્યોપાસકત્વેન ગુરુશિષ્યક્રમેણ ચ ।
સ્વામિભૃતાદિરૂપેણ ક્રીડતિ સ્વેચ્છયેશ્વરઃ ॥ ૭॥

પિતરં પ્રતિ પુત્રો યઃ પુત્રં પ્રતિ પિતૈવ સઃ ।
એક એવ હિ નાનેવ કલ્પ્યતે શબ્દમાત્રતઃ ॥ ૮॥

તસ્માત્પ્રકાશ એવાસ્તિ પરમાર્થનિરૂપણે ।
ભેદપ્રતીતિર્મિથ્યૈવ માયયાઽઽત્મનિ કલ્પિતા ॥ ૯॥

મિથ્યાત્વં નામ બાધ્યત્વં સમ્યગ્જ્ઞાનોદયે સતિ ।
શિષ્યાચાર્યોપદેશાદિ સ્વપ્નવત્પ્રતિભાસતે ॥ ૧૦॥

મિથ્યાભૂતોઽપિ વેદાન્તઃ સત્યમર્થં પ્રબોધયેત્ ।
દેવતાપ્રતિમાવચ્ચ ચિત્રવત્પ્રતિબિમ્બવત્ ॥ ૧૧॥

સર્વોઽપિ વ્યવહારોઽયં માયયા પરિજૃમ્ભણમ્ ।

સુષુપ્તિસદૃશી માયા સ્વપ્રબોધેન બાધ્યતે ॥ ૧૨॥

યુક્તિહીનપ્રકાશસ્ય સંજ્ઞા માયેતિ કથ્યતે ।
નાસતી દૃશ્યમાના સા બાધ્યમાના ન વા સતી ॥ ૧૩॥

ન પ્રકાશાદિયં ભિન્ના છાયેવાર્કસ્ય તામસી ।
ન ચાભિન્ના જડત્વેન વિરોધાન્નોભયાત્મિકા ॥ ૧૪॥

સ્વહેત્વવયવાભાવાન્નેયં સાવયવોચ્યતે ।
ન ચાવયવહીના સા કાર્યેષ્વવયવાન્વિતા ॥ ૧૫॥

અવિચારિતસિદ્ધેયં માયાવેશ્યાવિલાસિની ।
પુરુષં વઞ્ચયત્યેવ મિથ્યાભૂતૈઃ સ્વવિભ્રમૈઃ ॥ ૧૬॥

ન તસ્યા મૂલવિચ્છેદમભિવાઞ્છતિ કેચન ।
તેષાં પક્ષે કથં મોક્ષો મનસઃ સમ્ભવિષ્યતિ ॥ ૧૭॥

તિસ્રોપ્યવસ્થા મનસો જાગ્રત્સ્વપ્નસુષુપ્તયઃ ।
ચક્રવત્પરિવર્તન્તે ભેદભ્રાન્ત્યેકહેતવઃ ॥ ૧૮॥

તાભિઃ કરોતિ કર્માણિ પુનસ્તૈર્બધ્યતે મનઃ ।
મનસઃ કેવલઃ સાક્ષી ભાનુવત્પુરુષઃ પરઃ ॥ ૧૯॥

યથા પ્રાણિકૃતૈરર્કઃ કર્મભિર્નૈવ બધ્યતે ।
તથા મનઃકૃતૈરાત્મા સાક્ષિત્વાન્નૈવ બધ્યતે ॥ ૨૦॥

આત્મા કરોતિ કર્માણિ બધ્યતે મુચ્યતે ચ તૈઃ ।
ઇત્યૌપચારિકી ક્લૃપ્તિર્ભ્રમમાત્રૈવ કેવલમ્ ॥ ૨૧॥

ધૂમાભ્રધૂલીનીહારૈરસ્પૃષ્ટોઽપિ દિવાકરઃ ।
યથા છન્ન ઇવાભાતિ તથૈવાત્માઽપિ માયયા ॥ ૨૨॥

યથા લીલાવશાત્કશ્ચિદ્ભ્રામ્યમાણઃ કુમારકઃ ।
ભ્રમત્તત્પશ્યતિ જગત્ શતચન્દ્રં નભઃસ્થલમ્ ॥ ૨૩॥

તથૈવ માયયા જીવો ભ્રામિતો વાસનાવશાત્ ।
નાનાકારમિદં વિશ્વં ભ્રમમાણં ચ પશ્યતિ ॥ ૨૪॥

સંસૃજ્ય મનસા દેવઃ સંસરન્નિવ લક્ષ્યતે ।
યથાઽર્કો જલસંસર્ગાચ્ચલન્નાનેવ લક્ષ્યતે ॥ ૨૫॥

યોગાભ્યાસવશાધેન મનો નિર્વિષયં કૃતમ્ ।
નિવૃત્તઃ સ પુમાંસદ્યો જીવન્મુક્તો ભવિષ્યતિ ॥ ૨૬॥

દ્વા સુપર્ણૌ ચ સયુજાભવન્માયયા શિવઃ ।
અજામેકાં જુષન્નેકો નાનેવાસીદિતિ શ્રુતિઃ ॥ ૨૭॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે અષ્ટમોલ્લાસસઙ્ગ્રહઃ ॥ ૨૮॥

ભૂરમ્ભાંસ્યનલોઽનિલોઽમ્બરમહર્નાથો હિમાંશુઃ પુમાન્
ઇત્યાભાતિ ચરાચરાત્મકમિદં યસ્યૈવ મૂર્ત્યષ્ટકમ્ ।
નાન્યત્કિઞ્ચન વિદ્યતે વિમૃશતાં યસ્માત્પરસ્માદ્વિભોઃ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇદં શ્રીદક્ષિણામૂર્તયે ॥ ૯॥

કથમેવંવિધા માયા નિવર્તેતેતિ પૃચ્છતઃ ।
ઈશ્વરોપાસનારૂપસ્તદુપાયઃ પ્રકીર્ત્યતે ॥ ૧॥

ષટ્ત્રિંશત્તત્ત્વરૂપાસુ પરમેશ્વરમૂર્તિષુ ।
પ્રત્યક્ષેણોપલભ્યન્તે સર્વૈરપ્યષ્ટમૂર્તયઃ ॥ ૨॥

અમેયાસુ મનઃ ક્ષિપ્રમારોઢું નાર્હતીત્યતઃ ।
મૂર્ત્યષ્ટકમયીં બ્રૂત ગુરુઃ સર્વાત્મભાવનામ્ ॥ ૩॥

વિરાટ્છરીરે બ્રહ્માણ્ડે પ્રાણિનામપિ વિગ્રહે ।
ષટ્ત્રિંશત્તત્ત્વસઙ્ઘાતઃ સર્વત્રાપ્યનુવર્તતે ॥ ૪॥

વ્યાપ્તિર્વ્યષ્ટિશરીરેઽસ્મિન્મનસો વ્યષ્ટિરૂપિણઃ ।
તસ્માત્સર્વાત્મકમિદં સ્વશરીરં વિચિન્તયેત્ ॥ ૫॥

વ્યષ્ટ્યુપાસનયા પુંસઃ સમષ્ટિવ્યાપ્તિમાપ્નુયાત્ ।
ઉપસંક્રામતીત્યેવં દશકૃત્વ ઉપાદિશત્ ॥ ૬॥

બ્રહ્માણ્ડસ્યોદરે લોકાઃ સપ્તભૂરાદયઃ સ્મૃતાઃ ।
મૂલાદિબ્રહ્મરન્ધ્રાન્તેષ્વાધારેષુ વસન્તિ તે ॥ ૭॥

વીણાદણ્ડો મહામેરુસ્થીનિ કુલપર્વતાઃ ।
ગઙ્ગા તુ પિઙ્ગળા નાડી યમુનેડા પ્રકીર્તિતા ॥ ૮॥

સરસ્વતી સુષુમ્નોક્તા નાડ્યોન્યાઃ પુણ્યનિમ્નગાઃ ।
દ્વીપાઃ સ્યુર્ધાતવઃ સપ્ત સ્વેદબાષ્પાદયોબ્ધયઃ ॥ ૯॥

મૂલે તિષ્ઠતિ કાલાગ્નિરસ્થિમધ્યે ચ બાડબઃ ।
વૈદ્યુતોગ્નિઃ સુષુમ્નાયાં પાર્થિવો નાભિમણ્ડલે ॥ ૧૦॥

હૃદિ તિષ્ઠતિ સૂર્યાગ્નિઃ કપાલે ચન્દ્રમણ્ડલમ્ ।
નક્ષત્રાણ્યપરાણ્યાહુર્નેત્રાદીનીન્દ્રિયાણ્યપિ ॥ ૧૧॥

ધાર્યન્તે વાયુભિર્લોકાઃ યથા પ્રવહણાદિભિઃ ।
પ્રાણાદિભિર્દશવિધૈર્ધાર્યતે વાયુભિર્વપુઃ ॥ ૧૨॥

પ્રાપ્યેડાપિઙ્ગળે પ્રાણો મૂલાત્સૂર્યસ્વરૂપતઃ ।
નાસિકાભ્યાં બહિર્ગત્વા લીયતે દ્વિષડઙ્ગુલે ॥ ૧૩॥

અષ્ટાઙ્ગુળેન સોમાત્મા નાડીભ્યામન્તરાવિશત્ ।
મલમૂત્રમરુચ્છુક્રાણ્યપાનો વિસૃજેદ્બહિઃ ॥ ૧૪॥

અગ્નીષોમમયો ભૂત્વા સુષુમ્નારન્ધ્રમાશ્રિતઃ ।
આબ્રહ્મરન્ધ્રમુદ્ગચ્છન્નુદાનો વર્ધતે સ્વયમ્ ॥ ૧૫॥

વ્યાપયેદ્વપુષિ વ્યાનો ભુક્તાન્નરસમન્વહમ્ ।
સન્ધુક્ષણં સમાનસ્તુ કાયાગ્નેઃ કુરુતે સદા ॥ ૧૬॥

નાગો હિક્કાકરઃ કૂર્મો નિમેષોન્મેષકારકઃ ।
ક્ષુતં કરોતિ કૃકરો દેવદત્તો વિજૃમ્ભણમ્ ॥ ૧૭॥

સ્થૌલ્યં ધનઞ્જયઃ કુર્યાન્મૃતં ચાપિ ન મુઞ્ચતિ ।
આકાશો બહિરપ્યન્તરવકાશં પ્રયચ્છતિ ॥ ૧૮॥

ચન્દ્રાર્કૌ કાલનેતારૌ પ્રાણાપાનૌ શરીરિણામ્ ।
સાક્ષી પુરુષ ઇત્યેવં મૂર્ત્યષ્ટકમિદં વપુઃ ॥ ૧૯॥

સમનસ્કમિદં યોગી સેવમાન ઉપાસનમ્ ।
અષ્ટાઙ્ગયોગયુક્તઃ સન્નમનસ્કં સ ગચ્છતિ । ૨૦॥

મનઃ પ્રસાદઃ સન્તોષો મૌનમિન્દ્રિયનિગ્રહઃ ।
દયા દાક્ષિણ્યમાસ્તિક્યમાર્જવં માર્દવં ક્ષમા ॥ ૨૧॥

ભાવશુદ્ધિરહિંસા ચ બ્રહ્મચર્યં સ્મૃતિર્ધૃતિઃ ।
ઇત્યેવમાદયોન્યે ચ મનઃ સાધ્યા યમાઃ સ્મૃતાઃ ॥ ૨૨॥

સ્નાનં શૌચં ક્રતુઃ સત્યં જપો હોમશ્ચ તર્પણમ્ ।
તપો દાનં તિતિક્ષા ચ નમસ્કારઃ પ્રદક્ષિણમ્ ॥ ૨૩॥

વ્રતોપવાસાદ્યાશ્ચાન્યે કાયિકા નિયમાઃ સ્મૃતાઃ ।
સ્વસ્તિકં ગોમુખં પદ્મં હંસાખ્યં બ્રાહ્મમાસનમ્ ॥ ૨૪॥

નૃસિંહં ગરુડં કૂર્મં નાગાખ્યં વૈષ્ણવાસનમ્ ।
વીરં મયૂરં વજ્રાખ્યં સિદ્ધાખ્યં રૌદ્રમાસનમ્ ॥ ૨૫॥

યોન્યાસનં વિદુઃ શાક્તં શૈવં પશ્ચિમતાનકમ્ ।
નિરાલમ્બનયોગસ્ય નિરાલમ્બનમાસનમ્ ॥ ૨૬॥

નિરાલમ્બતયા ધ્યાનં નિરાલમ્બઃ સદાશિવઃ ।
રેચકઃ પૂરકશ્ચૈવ કુમ્ભકઃ પ્રાણસંયમઃ ॥ ૨૭॥

ઇન્દ્રિયાણાં સમસ્તાનાં વિષયેભ્યો નિવારણમ્ ।
પ્રત્યાહાર ઇતિ પ્રોક્તં પ્રત્યાહારાર્થવેદિભિઃ ॥ ૨૮॥

આધારે ક્વાપિ મનસઃ સ્થાપનં ધારણોચ્યતે ।
બ્રહ્મવિષ્ણુશિવાદીનાં ચિન્તા ધ્યાનં પ્રચક્ષતે ॥ ૨૯॥

ધ્યાનાદસ્પન્દનં બુદ્ધેઃ સમાધિરભિધીયતે ।
અમનસ્કસમાધિસ્તુ સર્વચિન્તાવિવર્જિતમ્ ॥ ૩૦॥

ચિત્તે નિશ્ચલતાં યાતે પ્રાણો ભવતિ નિશ્ચલઃ ।
ચિત્તસ્ય નિશ્ચલત્વાય યોગં સધ્યાનમભ્યસેત્ ॥ ૩૧॥

આકુઞ્ચનમપાનસ્ય પ્રાણસ્ય ચ નિરોધનમ્ ।
લમ્બિકોપરિ જિહ્વાયાઃ સ્થાપનં યોગસાધનમ્ ॥ ૩૨॥

ચિત્તે નિશ્ચલતાં યાતે પ્રાણે મધ્યપથં ગતે ।
ચિહ્નાન્યેતાનિ જાયન્તે પઞ્ચભૂતજયાત્પૃથક્ ॥ ૩૩॥

મલમૂત્રકફાલ્પત્વમારોગ્યં લઘુતા તનોઃ ।
સુગન્ધઃ સ્વર્ણ[સ્વર] વર્ણત્વં પ્રથમં યોગલક્ષણમ્ ॥ ૩૪॥

કણ્ટકાગ્રેષ્વસઙ્ગત્વં જલપઙ્કેષ્વમજ્જનમ્ ।
ક્ષુત્તૃડાદિસહિષ્ણુત્વં દ્વિતીયં યોગલક્ષણમ્ ॥ ૩૫॥

બહ્વન્નપાનભોક્તૃત્વમાતપાગ્નિસહિષ્ણુતા ।
દર્શનં શ્રવણં દૂરાત્તૃતીયં યોગલક્ષણમ્ ॥ ૩૬॥

મણ્ડૂકપ્લવનં ભૂમૌ મર્કટપ્લવનં દ્રુમે ।

આકાશગમનં ચેતિ ચતુર્થં યોગલક્ષણમ્ ॥ ૩૭॥

જ્ઞાનં ત્રિકાલવિષયમૈશ્વર્યમણિમાદિકમ્ ।
અનન્તશક્તિમત્વં ચ પઞ્ચમં યોગલક્ષણમ્ ॥ ૩૮॥

પ્રાણે સુષુમ્નાં સમ્પ્રાપ્તે નાદોન્તઃ શ્રૂયતેઽષ્ટધા ।
ઘણ્ટાદુન્દુભિશઙ્ખાબ્ધિવીણાવેણ્વાદિતાલવત્ ॥ ૩૯॥

તનૂનપાત્તટિત્તારાતારેશતપનોપમમ્ ।
બ્રહ્મનાડીં ગતે પ્રાણે બિમ્બરૂપં પ્રકાશતે ॥ ૪૦॥

શ્વાસાશ્ચરન્તિ યાવન્તો મનુષ્યસ્ય દિનં પ્રતિ ।
તાવન્તિ યોજનાન્યર્કઃ શ્વાસેશ્વાસે પ્રધાવતિ ॥ ૪૧॥

એકવિંશતિસાહસ્રં ષટ્છતં શ્વાસસઙ્ખ્યયા ।
સોઽહમિત્યુચ્ચરત્યાત્મા મન્ત્રં પ્રત્યહમાયુષે ॥ ૪૨॥

સકારં ચ હકારં ચ લોપયિત્વા પ્રયોજયેત્ ।
સન્ધિં વૈ પૂર્વરૂપાખ્યં તતોઽસૌ પ્રણવો ભવેત્ ॥ ૪૩॥

અકારશ્ચાપ્યુકારશ્ચ મકારો બિન્દુનાદકૌ ।
પઞ્ચાક્ષરાણ્યમૂન્યાહુઃ પ્રણવસ્થાનિ પણ્ડિતાઃ ॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચાપીશ્વરશ્ચ સદાશિવઃ ।
તેષ્વક્ષરેષુ તિષ્ઠન્તિ ષટ્ત્રિંશત્તત્ત્વસંયુતાઃ ॥ ૪૫॥

ગુરુપ્રસાદાલ્લભતે યોગમષ્ટાઙ્ગલક્ષણમ્ ।
શિવપ્રસાદાલ્લભતે યોગસિદ્ધિં ચ શાશ્વતીમ્ ॥ ૪૬॥

સચ્ચિદાનન્દરૂપાય બિન્દુનાદાન્તરાત્મને ।
આદિમધ્યાન્તશૂન્યાય ગુરૂણાં ગુરવે નમઃ ॥ ૪૭॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે નવમોલ્લાસસઙ્ગ્રહઃ ॥ ૪૮॥

સર્વાત્મત્વમિતિ સ્ફુટીકૃતમિદં યસ્માદમુષ્મિંસ્તવે
તેનાસ્ય શ્રવણાત્તદર્થમનનાદ્ધ્યાનાચ્ચ સંકીર્તનાત્ ।
સર્વાત્મત્વમહાવિભૂતિસહિતં સ્યાદીશ્વરત્વં સ્વતઃ
સિદ્ધ્યેત્તત્પુનરષ્ટધા પરિણતં ચૈશ્વર્યમવ્યાહતમ્ ॥ ૧૦॥

પરિચ્છિન્નમહમ્ભાવં પરિત્યજ્યાનુષઙ્ગિકમ્ ।

પૂર્ણાહમ્ભાવલાભોસ્ય સ્તોત્રસ્ય ફલમુચ્યતે ॥ ૧॥

પુત્રપૌત્રગૃહક્ષેત્રધનધાન્યસમૃદ્ધયઃ ।
અર્વાચીનાશ્ચ સિધ્યન્તિ સ્વર્ગપાતાળભૂમિષુ ॥ ૨॥

પાકે પ્રવર્તમાનસ્ય શીતાદિપરિહારવત્ ।
પ્રાસઙ્ગિકાશ્ચ સિધ્યન્તિ સ્તોત્રેણાનેન સર્વદા ॥ ૩॥

ઐશ્વર્યમીશ્વરત્વં હિ તસ્ય નાસ્તિ પૃથક્સ્થિતિઃ ।
પુરુષે ધાવમાનેઽપિ છાયા તમનુધાવતિ ॥ ૪॥

અનન્તશક્તિરૈશ્વર્યં નિષ્યન્દાશ્ચાણિમાદયઃ ।
સ્વસ્યેશ્વરત્વે સંસિદ્ધે સિધ્યન્તિ સ્વયમેવ હિ ॥ ૫॥

યદીયૈશ્વર્યવિપ્રુડ્ભિર્બ્રહ્મવિષ્ણુશિવાદયઃ ।
ઐશ્વર્યવન્તો શાસન્તે સ એવાત્મા સદાશિવઃ ॥ ૬॥

પુષ્પમાનયતા ગન્ધો વિનેચ્છામનુભૂયતે ।
પૂર્ણાહમ્ભાવયુક્તેન પરિચ્છિન્ના વિભૂતયઃ ॥ ૭॥

અણિમા મહિમા ચૈવ ગરિમા લઘિમા તથા ।
પ્રાપ્તિઃ પ્રાકામ્યમીશિત્વં વશિત્વં ચાષ્ટસિદ્ધયઃ ॥ ૮॥

અત્યન્તમણુષુ પ્રાણિષ્વાત્મત્વેન પ્રવેશનમ્ ।
અણિમાસંજ્ઞમૈશ્વર્યં વ્યાપ્તસ્ય પરમાત્મનઃ ॥ ૯॥

બ્રહ્માણ્ડાદિશિવાન્તાયાઃ ષટ્ત્રિંશત્તત્ત્વસંહતેઃ ।
બહિશ્ચ વ્યાપ્યવૃત્તિત્વમૈશ્વર્યં મહિમાહ્વયમ્ ॥ ૧૦॥

મહામેરુસમાઙ્ગસ્ય સમુદ્ધરણકર્મણિ ।
લાઘવે તૂલતુલ્યત્વં લઘિમાનં વિદુર્બુધાઃ ॥ ૧૧॥

પરમાણુસમાઙ્ગસ્ય સમુદ્ધરણકર્મણિ ।
ગુરવે મેરુતુલ્યત્વં ગરિમાણં વિદુર્બુધાઃ ॥ ૧૨॥

પાતાલવાસિનઃ પુંસો બ્રહ્મલોકાવલોકનમ્ ।
પ્રાપ્તિર્નામ મહૈશ્વર્યં સુદુષ્પ્રાપમયોગિનામ્ ॥ ૧૩॥

આકાશગમનાદીનામન્યાસં સિદ્ધિસમ્પદામ્ ।
સ્વેચ્છામાત્રેણ સંસિદ્ધિઃ પ્રાકામ્યમભિધીયતે ॥ ૧૪॥

સ્વશરીરપ્રકાશેન સર્વાર્થાનાં પ્રકાશનમ્ ।
પ્રાકાશ્યમિદમૈશ્વર્યમિતિ કેચિત્પ્રચક્ષતે ॥ ૧૫॥

સ્વેચ્છામાત્રેણ લોકાનાં સૃષ્ટિસ્થિત્યન્તકર્તૃતા ।
સૂર્યાદિનાં નિયોક્તૃત્વમીશિત્વમભિધીયતે ॥ ૧૬॥

સલોકપાલાઃ સર્વેઽપિ લોકાઃ સ્વવશવર્તિનઃ ।
તદૈશ્વર્યં વશિત્વાખ્યં સુલભં શિવયોગિનામ્ ॥ ૧૭॥

યસ્ત્વેવં બ્રાહ્મણો વેત્તિ તસ્ય દેવા વશે સ્થિતાઃ ।
કિં પુનઃ ક્ષ્માપતિવ્યાઘ્રવ્યાળસ્ત્રીપુરુષાદયઃ ॥ ૧૮॥

સર્વાત્મભાવસામ્રાજ્યનિરન્તરિતચેતસામ્ ।
પરિપક્વસમાધીનાં કિં કિં નામ ન સિધ્યતિ ॥ ૧૯॥

સ્તોત્રમેતત્પઠેદ્ધીમાન્સર્વાત્મત્વં ચ ભાવયેત્ ।
અર્વાચીને સ્પૃહાં મુક્ત્વા ફલે સ્વર્ગાદિસમ્ભવે ॥ ૨૦॥

સ્વર્ગાદિરાજ્યં સામ્રાજ્યં મનુતે ન હિ પણ્ડિતઃ ।
તદેવ તસ્ય સામ્રાજ્યં યત્તુ સ્વારાજ્યમાત્મનિ ॥ ૨૧॥

સર્વાત્મભાવનાવન્તં સેવન્તે સર્વસિદ્ધયઃ ।
તસ્માદાત્મનિ સામ્રાજ્યં કુર્યાન્નિયતમાનસઃ ॥ ૨૨॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૨૩॥

પ્રકાશાત્મિકયા શક્ત્યા પ્રકાશાનાં પ્રભાકરઃ ।
પ્રકાશયતિ યો વિશ્વં પ્રકાશોઽયં પ્રકાશતામ્ ॥ ૨૪॥

ઇતિ શ્રીદક્ષિણામૂર્તિસ્તોત્રાર્થપ્રતિપાદકે ।
પ્રબન્ધે માનસોલ્લાસે દશમ્મોલ્લાસસઙ્ગ્રહઃ ॥ ૨૫॥

ઇતિ શ્રીમચ્છઙ્કરભગવત્પાદાચાર્યકૃત
દક્ષિણામૂર્તિસ્તોત્રભાવાર્થવાર્તિકં
સુરેશ્વરાચાર્યકૃતં સમાપ્તમ્ ॥

ૐ તત્ સત્ ॥

Encoded and proofread by Sunder Hattangadi

*Manasollasa*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*